# RAMSADAY COLLEGE

## Department of Sanskrit

**Semester: vi**

**Paper-: CC-11**

**Topic: Tarkasamgraha**

**Prepared by- Soumen Samanta**

# श्रीः

## तर्कसंग्रहः

**∆ किं नाम सन्निकर्षः? लौकिकसन्निकर्षस्य भेदाः सम्यकालोच्यताम्।**

**सन्निकर्षः कः**

इन्द्रियार्थयोः यः सम्बन्धः प्रत्यक्षज्ञानस्य कारणं भवति, दर्शनपरिभाषायां तदेव सन्निकर्ष इत्युच्यते। अतः सन्निकर्ष इत्युक्ते प्रत्यक्षात् पूर्वं केनचित् पदार्थेन सह इन्द्रियस्य सम्बन्ध एव अवगम्यते । पदार्थभेदे सन्निकर्षोऽपि भिन्नो भिन्नो भवति।

### विभागः

आचार्येण अन्नम्भट्टेन तर्कसंग्रहग्रन्थे लौकिकप्रत्यक्षस्य आलोचना कृता । लौकिकसन्निकर्षः षड्विधो भवति। यथा- संयोगः, संयुक्तसमवायः, संयुक्त समवेतसमवायः, समवायः, समवेतसमवायः, विशेष्यविशेषणभावश्चेति।

### १. संयोगसन्निकर्षः

यदा चक्षुषा घटविषयकं ज्ञानमुत्पद्यते तदा अयं सन्निकर्षः भवति। तदुक्तम् आचार्येण - ' चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः' इति। तदानीं चक्षुर्भवति इन्द्रियं, घटश्च अर्थः, तयोः सन्निकर्षः संयोगो भवति। ततात्पर्यन्तु यदा इन्द्रियेण साकं कस्यचित् द्रव्यस्य साक्षात्कारो भवति तदा अयमेव सन्निकर्षो भवति। एवं मनसा अन्तरिन्द्रियेण यदा आत्मविषयकं ज्ञानमुत्पद्यते अहमिति तदापि संयोगसन्निकर्ष एव ।

## २. संयुक्तसमवायः

यदा चक्षुरादिना घटगतरूपादिकं गृह्यते श्यामं रूपमस्तीति तदा अयं सन्निकर्षो भवति। उच्यते च -"घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः । चक्षुसंयुक्ते घटे रूपस्य समवायात्" इति। अर्थात् तदानीं चक्षुरिन्द्रियं, घटरूपमर्थः, तयोः सन्निकर्षः संयुक्तसमवाय एव । चक्षुसंयुक्ते घटे रूपस्य समवायात्। एवं मनसा आत्मसमवेते सुखादौ गृह्यमाणे संयुक्तसमवायसन्निकर्षो भवति।

## ३. संयुसम्वेतसमवायः

कदा च संयुक्तसमवेतसमवायसन्निकर्षो भवतीति जिज्ञासायामुच्यते यदा चक्षुषा घटरूपसमवेतं रूपत्वादिसामान्यं गृह्यते तदा अयं सन्निकर्षो भवति। उच्यते- रूपत्वसामान्यप्रत्यक्षे संयुकसमवेतसमवायः सन्निकर्षः । चक्षुसंयुक्ते घटे रपं समवेतं, तत्र रूपत्वस्य समवायात्" इति। अर्थात् तदानीं चक्षुर्भवति इद्धियं, रूपत्वादिसामान्यं भवति अर्थः, तयोः सन्निकर्षः संयुक्तसमवेतसमवाय इति। चक्षुसंयुक्ते घटे रूपं समवेतं, तत्र पुनः रूपत्वस्य समवायादिति।

## ४. समवायः

कदा खलु समवायसन्निकर्षः इति चेदुच्यते यदा श्रोत्रेद्धियेण शब्दो गृह्यते तदा अयं सन्निकर्षो भवति। तदुक्तमन्नम्भट्टेन- 'श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः ' इति। यतो हि तदानीं श्रोत्रं भवति इन्द्रियं, शब्दश्च अर्थः, तयोः सन्निकर्षः समवाय इति। तस्य श्रोत्रस्य आकाशात्मकत्वात् शब्दस्य च आकाशगुणत्वात् गुणगुणिनोश्च समवायात् अयमेव सन्निकर्ष इति।

### ५. समवेतसमवायः

कदा च समवेतसमवायसन्निकर्ष इति जिज्ञासायामुच्यते यदा पुनः शब्दसमवेते शब्दत्वादिकं श्रोत्रेन्दियेण गृह्यते तदा अयं सन्निकर्षे भवति। तदुक्तं- 'शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य

समवायात्" इति। अर्थात् तदानीं श्रोत्रं भवति इद्धियं शब्दत्वादि सामान्यमर्थः, तयोः सन्निकर्षः समवेतसमवाय एव । श्रोत्रसमवेते शब्दे शब्दत्वं समवायसम्बन्धेन तिष्ठति। अतः अयं सन्निकर्षः ।

## ६. विशेष्यविशेषणभावः

कदा खलु विशेषणविशेष्यभावः इति चेदुच्यते यदा पुनः चश्चुषा संयुक्ते भूतले घटाभावो गृहाते - "इह भूतले घटो नास्तीति" तदा विशेष्यविशेषणभावः सन्निकर्षः इति। तदुक्तं - " अभावप्रत्यक्षे विशेष्यविशेषणभावः सत्निकर्षः । घटाभाववद्भूतलमित्यत्र चक्षुः संयुक्ते भूतले घटाभावस्य विशेषणत्वात्" इति। अर्थात् तदानीं चक्षुसंयुक्तस्य भूतलस्य घटाद्यभावो विशेषणं, भूतलं च विशेष्यमिति।

आचार्यः अन्नम्भट्टः इद्धियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति उक्तवान्। तस्मात् ज्ञानस्य असाधारणं कारणं अर्थात् करणं भवति इन्द्रियम्। अतः प्रत्यक्षप्रमायाः करणत्वात् इन्द्रियमेव प्रत्यक्षप्रमाणमिति ग्राह्यम्। किन्तु प्रत्यक्षस्य अव्यवहितपूर्ववर्ती व्यापारः भवति। तस्मात् सन्निकर्ष एव प्रत्यक्षप्रमाणमिति उच्यते चेत् समीचिनं स्यात्। अत्र मन्ये अन्नम्भट्टेन प्राचीनमतं अनुसृतमिति शम्।।

---